# कर्मकाण्डसंस्कारविज्ञानम्



प्रधानसम्पादकः
प्रो. अर्कनाथचौधरी

सम्पादकः
डॉ. शत्रुघ्नपाणिग्राही

श्री सोमनाथ संस्कृत विश्वविद्यालय

सहसम्पादकः
डॉ. अश्विन का. राजगोर

Scanned with CamScanner

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्रीसन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)

प्रधानसम्पादकः

प्रो. अर्कनाथचौधरी

सम्पादकः

डॉ. शत्रुघ्नपाणिग्राही

सहसम्पादकः

डॉ. अश्विन का. राजगोरः


प्रकाशकः

डॉ. महेन्द्रकुमार अं. दवे

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

राजेन्द्रभुवनरोड, वेरावलम्-३६२ २६६.

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाषा : ०२८७६-२४४५३२

**E-mail :** sssu.veraval@gmail.com


Scanned with CamScanner

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)

**आयोजकसंस्थाः**

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

**संरक्षकाः**

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः

**प्रकाशकः**

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

**मुद्रणम्ः**

**जलाराम ग्राफीक्स अेन्ड ओफसेट**
**परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,**
**अेस टी रोड, वेरावल - ३६२ २६६.**
**फोन : (०२८७६) २२१८६१**

Scanned with CamScanner

## अनुक्रमणिका



| क्रमांक: | विषय: | नाम | पृष्ठ: |
|---|---|---|---|
| १. | सम्पादकीयम् | डॉ. शत्रुघ्नपाणिग्राही | iii |
| २. | प्रास्ताविकम् | डॉ. अश्विन का. राजगोर: | iv |
| ३. | परम पूज्य ब्रह्मलीन संत श्री १०८ श्री संध्यागिरिबापु का जीवन चरित्र | भगतत्सेवक भगवत्गिरिबापु | v-vi |
| ४. | गिरनारी आश्रम | डॉ. अश्विन का. राजगोर: | vii |
| ५ | संस्था के उद्देश्य और प्रवृत्ति | श्री विपुलभाई शास्त्री | viii |
| ६ | पारदेश्वर अर्थात् पारे का शिवलिंग का माहात्म्य | श्री रमेशभाई के. जोषी | ix |
| ७. | वैदिकविज्ञान के अर्थचिन्तन में उपयोगी कतिपय पारिभाषिकपदों का विवेचन | प्रो. अर्कनाथ चौधरी | १-३ |
| ८. | उपनयन संस्कार की वर्तमान समय में उपयोगिता | प्रो. कमलेशकुमार छ. चोकसी | ४-७ |
| ९. | कठोपनिषदि मानवीयजीवनमूल्यसंस्कारमीमांसा | प्रो. जयप्रकाशनारायणद्विवेदी | ८-१२ |
| १०. | सामाजिकजीवने उपनयनसंस्कारस्यावश्यकता | डॉ. महेन्द्रकुमार अं. दवे | १३-१७ |
| ११. | व्याकरणशास्त्रदृष्ट्या 'गो' शब्दविमर्श: | प्रो. विनोद कुमार झा | १८-२४ |
| १२. | सन्ध्यावन्दनमहत्त्वम् | डॉ. नरेन्द्रकुमार पण्डया | २५-२७ |
| १३. | संस्काराणामाधुनिकयुगे महत्त्वम् | प्रो. अर्चना दुबे | २८-३५ |
| १४. | गोत्वं तस्या: यज्ञे योगदानम् | डॉ. कृष्णप्रसाद निरौला | ३६-३७ |
| १५. | ब्राह्मसंस्कारवैशिष्ट्यं स्मृतिशास्त्रे प्रकीर्त्तितम् | प्रो. कमलेशमिश्र: | ३८-४१ |
| १६. | भावो हि विद्यते देव: | डॉ. रामराज उपाध्याय | ४२-४५ |
| १७. | वेदे स्मृतौ च गोर्महत्त्वम् | आचार्यश्रीरवीन्द्रनाथभट्टाचार्य: | ४६-५० |
| १८. | गोतत्त्वदर्शनम् | डॉ. विश्वनाथस्वाइ | ५१-५३ |
| १९. | श्रुतिस्मृतिपुराणादिषु गोर्महत्त्वम् | प्रो. महेन्द्र पाण्डेय | ५४-५६ |
| २०. | कर्मकाण्डमहिमा | डॉ. अमृतलाल: भोगयता | ५७-५८ |
| २१. | साम्प्रतं सन्ध्योपासनस्यौचित्यम् | डॉ. रामानुज उपाध्याय | ५९-६१ |
| २२. | अग्निहोत्र यज्ञ: एक सुपरीक्षित वैज्ञानिक प्रक्रिया | डॉ. भावप्रकाश एम. गांधी | ६२-६५ |
| २३. | वेदप्रणीतगृहस्थाश्रमसिद्धान्ता: | राजगोर रविशंङ्कर: कुम्भाभाई | ६६-६९ |
| २४. | सामाजिकजीवने उपनयनसंस्कारस्यावश्यकता | डॉ. महेन्द्रकुमार अं. दवे | ७०-७२ |
| २५. | वेदेषु शास्त्रेषु च गो: महिमा | डॉ. ललितपटेल: | ७३-७५ |
| २६. | धेनोर्महत्त्वम् | डॉ. डायालाल मा. मोकरिया | ७६-७८ |
| २७. | वेदेषु गोतत्त्वम् | डॉ. शत्रुघ्नपाणिग्राही | ७९-८२ |



Scanned with CamScanner

## अनुक्रमणिका


| क्रमांक: | विषय: | नाम | पृष्ठ: |
|---|---|---|---|
| २८. | वैदिकवाङ्मय में गौ | डॉ. गिरिधारी पण्डा | ८३-८४ |
| २९. | अग्निहोत्रम्-एकं परिशीलनम् | डॉ. निरञ्जनमिश्र: | ८५-८७ |
| ३०. | यज्ञादिकर्मणां ब्रह्मविचारे उपयोग: | डॉ. जानकीशरण: आचार्य: | ८८-९१ |
| ३१. | दार्शनिकदृष्ट्या यज्ञस्वरूपम् | डॉ. बी. उमामहेश्वरी, | ९२-९५ |
| ३२. | गो-माहात्म्यम् | डॉ. सङ्कल्पमिश्र: | ९६-९९ |
| ३३. | वेदे आदर्शदाम्पत्यजीवनम् | डॉ. गिरीजाप्रसाद शडङ्गी | १००-१०४ |
| ३४. | वेदे गोमहत्त्वम् | प्रा. डॉ. राजेन्द्रकुमार जे पण्डया | १०५-१०८ |
| ३५. | वेद शास्त्रो में गाय | डॉ. अमीषा एच. दवे | १०९-११० |
| ३६. | वेदप्रणीतगृहस्थाश्रमसिद्धान्ता: | राजगोर रविशंङ्कर: कुम्भाभाइ | १११-११४ |
| ३७. | संस्कारेषु विज्ञानम् | व्यास पन्नालाल धर्मचन्द | ११५-११७ |
| ३८. | अग्निहोत्र यज्ञ | श्रीविपुलजादव: | ११८-१२१ |
| ३९. | समावर्तनसंस्कारस्य माहात्म्यम् | राजपरा मनिष: | १२२-१२४ |
| ४०. | श्राद्धतत्त्वम् – कालसर्वस्वोक्तदिशा | शुभश्री त्रिपाठी | १२५-१२९ |
| ४१. | अथर्ववेदे गो: विश्वरूपदर्शनम् | हार्दिक: डि कल्याणि | १३०-१३२ |
| ४२. | सन्ध्यावन्दनम् | श्री दुर्गाशरणरथ: (शोधच्छात्र:) | १३३-१३५ |
| ४३. | भारतीयसंस्कृतौ गोर्महत्त्वम् | डॉ. दुर्गाचरणषडङ्गो | १३६-१४१ |
| ४४. | अग्निहोत्रयाग: | डॉ. अश्विन का. राजगोर | १४२-१४४ |
| ४५. | गो-तत्त्वम्, तस्या: यागे योगदानम्, गोर्महत्वञ्च | डॉ. पङ्कजकुमार एस. रावल | १४५-१४९ |
| ४६. | शास्त्रपरम्परा में गो माता का विचार | डॉ. प्रशान्तकुमारपण्डा | १५०-१५२ |
| ४७. | वेदेषु गोतत्वविचार: | डॉ. ज्ञानरंजनपण्डा | १५३-१५७ |
| ४८. | आधुनिकसमाजे यज्ञानां प्रासङ्गिकता | डॉ. सोमनाथदाश: | १५८-१६१ |
| ४९. | वैदिक कर्म | पू. स्वामी स्वयंप्रकाशगिरि | १६२-१६३ |
| ५०. | अग्निहोत्रयागस्य वैशिष्ट्यम् | जोषी केवल: | १६४-१६५ |
| ५१. | Science behind Karmakand - | Prof. D.N.Pandeya | १६६-१७० |
| ५२. | Ved is the Embodiments of Refinement | Shree Rajkishor Ojha | १७१-१७२ |


Scanned with CamScanner

# सन्ध्यावन्दनमहत्त्वम्

डॉ. नरेन्द्रकुमार पण्डया

## सन्ध्यामहत्त्वम् –

सन्ध्यावन्दनं सनातनवैदिकधर्मपरम्परायां नित्यं कर्म प्रोक्तमस्ति । सन्ध्या तु प्रातः मध्याह्ने सायं चेति त्रिकाले विधीयमानं सूर्योपासनारूपं कर्म मुख्यत्वेन वरीवर्ति । अहरहः सन्ध्यामुपासीत इति श्रुतिः सन्ध्योपासना नित्यमेव करणीयेति बोधयति । सन्ध्याऽकरणे शुचित्वहानिः भवति एवं च अन्यधार्मिककर्मसु अपि अनर्हत्वं निष्फलत्वं च जायते । यथोक्तं तत्रैव शुचित्वसम्पादने कर्माङ्गतामाह दक्षः – सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत् इति ।। कर्मप्रदीपे कात्यायनः – अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः इति ।। (क. प्र. पृ. १६०) इत्थं स्मृतिवचनानुसारं सन्ध्यावन्दनं शुचित्वसम्पादनेन अन्येषु कर्मसु अधिकारसम्पादकत्वात् कर्माङ्गतां भजते । अत्र कर्माङ्गता प्रातःसन्ध्याया एव इति केषाञ्चित् मतमस्ति । सन्ध्यात्रयस्य अपि कर्माङ्गता इत्यपि मतमस्ति । सन्ध्यावन्दनं ब्राह्मण्यं वर्तते । तत्रादराभावः निन्दाप्रयोजकः ब्राह्मण्यहानिकरश्च विद्यते । सन्ध्योपासनापरायणं ब्राह्मणं उरगाः गरुत्मन्तं गरुडमिव न उपसर्पन्ति । यथोक्तम् – कर्मप्रदीपे कात्यायनः – एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मणे यत्र तिष्ठति । यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ।। सन्ध्यालोपाच्च चकितः स्नानशीलश्च यः सदा । तं दोषा नोपसर्पन्ति गरुत्मन्तमिवोरगाः ।। (क. का प्र. पृ. १६१)

## सन्ध्याशब्दार्थविचार :-

सन्ध्यासु कर्तव्यं यत्कर्म तदेव तत्प्रमुख्यन्यायेन दर्शपूर्णमासादिवत् सन्ध्या इति उच्यते । सन्ध्याशब्दे ध्यै चिन्तायाम् इति धातुः अस्ति तेन सम्यक् ध्यानं सन्ध्या इति निरुक्त्याऽर्थो लभ्यते । उपासनारुपं ध्यानं सन्ध्या अस्ति । सन्ध्यावन्दनकर्मणि प्रामुख्येन सूर्योपासनाया महत्त्वमस्ति । गायत्रीमन्त्रजपेन, प्राणायामेन, सूर्यार्घ्यदानेन, सूर्योपस्थानेन विशेषतः सूर्यस्य आराधना विधीयते । सन्ध्यामुपासते ये तु सततं शंस्तितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् इति फलसम्बन्धात् सन्ध्यावन्दनकर्मणि ध्यानस्य सूर्योपासनस्य प्राधान्यं अस्ति । अर्जुनादिभिः रणाङ्गणे असामर्थ्यात् सूर्योपासनमात्रं प्रधानमकारि । यथोक्तं भारते ते तथैव महाराज दंशिता रणमूर्धनि । सन्ध्यागतं सहस्रांशुमादित्यमुपतस्थिरे इति ।। तथा च तैत्तिरीये उद्यन्तमादित्यमभिध्यायं कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते आसावादित्यो ब्रह्मैव सन् ब्रह्माप्येति य एवं वेदेति (क. का. प्र. पृ. १६१) अत्र कुर्वन इति पदस्यार्थः गायत्रीजपः इत्येवं कृतः अस्ति । अज्ञानात् जीवभावं प्राप्तः विद्वान् येन ध्यानेन सकलं भद्रमश्नुते ब्रह्मभावं च प्राप्नोति । एवंरीत्या इदं सन्ध्याकर्म प्रमुखतया सूर्यस्य ध्यानमुपासनमस्ति । गायत्रीमन्त्रे अपि धीमहि इति आर्षप्रयोगेण ध्यानस्य एव विधानमस्ति । सूर्यस्य वरेण्यभर्गस्य ध्यानमभिहितं विद्यते । गायत्रीमन्त्रस्य देवता सविता सूर्यः अस्ति । सन्ध्याशब्दार्थं प्रकाशयन् महर्षिः व्यासः सन्ध्येति सूर्यगं ब्रह्मसन्धानादविभागतः । ब्रह्माद्यैः सकलैर्मूर्तैः स्तम्बान्तैः सच्चिदात्मनः ।। तस्य दासोऽहमस्मीति सोऽहमस्मीति वा मतिः । भवेदुपासकस्येति ह्येवं बहुविदो विदुः । (क. का. प्र. पृ. १६१) अत्र अपि सूर्यध्यानं ब्रह्मनिदिध्यासनरूपं अभेदभावनया दासोऽहं अथवा सोऽहं इति भावना सन्ध्यायां प्रामुरुपेन दृश्यते इति बहुविदां मतमस्ति । सवितुः सूर्यनारायणस्य एव कालभेदेन गायत्री सावित्री सरस्वती इति नामानि सन्ति । यथोक्तम् – गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने । सरस्वती च सायाह्ने सैव सन्ध्या त्रिषु स्मृता इति । (क.का.प्र.पृ. १६१)



Scanned with CamScanner

## सन्ध्यावन्दने प्रमुखानुष्ठेयानि कर्माणि –

सन्ध्यावन्दने प्रामुख्येन गायत्रीजप: अस्ति । मनुस्मृतिटीकायां फलवत्त्वाद् गायत्रीजपस्य प्राधान्यं इति कथितम् । मेधातिथिमते सूर्योपासनस्य सूर्योपस्थानस्य आसनस्य च महत्त्वमस्ति । वस्तुत: शब्दार्थविचारेणाऽपि अभेदेन गायत्र्युपासना मुख्या इति विदितं भवति व्यास: न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । सोऽहमस्मीत्युपासीत विधिना येनकेनचित् इति (क.कां.प्र.पृ. १६२) अत्रापि ब्रह्मणा सह अभेदेन सोऽहम् इति उपासना गायत्र्युपासना कथिता । गायत्रीजप: सूर्योपस्थानम् इत्यनेन सह प्राणायाम: अर्घप्रदानं, मन्त्राचमनं, अघमर्षणं, मार्जनम् इत्यादीनि सन्ध्यावन्दने समाविष्टानि कर्माणि भवन्ति ।

## सन्ध्यावन्दनप्रकारा: ।

सन्ध्या त्रिविधा अस्ति प्रात:काले विधीयमाना प्रात:सन्ध्या, मध्याहनकाले विधीयमाना मध्याह्नसन्ध्या सायंकाले विधीयमाना सायंसन्ध्या इति । आचारमयूखे धर्मसारे उत्तमा तारकोपेता मध्यमा लुप्ततारका । अधमा सूर्यसंहिता प्रात:सन्ध्या त्रिधा मता । उत्तमा सूर्यसंहिता मध्यमा लुप्तभास्करा । अधमा तारकोपेता सायंसन्ध्या त्रिधा मता । (ब्र.नि.क.पृ. ११) एवं उभयसन्ध्या त्रिविधा इति कथितम् ।

## सन्ध्यादेशकथनम् ।

गृहे त्वेकगुणा सन्ध्या गोष्ठे दशगुणा स्मृता । शतसाहस्रिका नद्यामनन्ता विष्णुसंनिधौ । बहि:सन्ध्या दशगुणा गर्तप्रस्रवणेषु च । ख्याते तीर्थे शतगुणा ह्यनन्ता जाह्नवीजले । (क.का.प्र.कृ. १६२) अनया रीत्या विष्णुसन्निधौ जाह्नवी जले च सर्वाधिकं सन्ध्यामहत्त्वमस्ति । गृहे गोष्ठे नद्यां तीर्थे गर्तप्रस्रवणादिषु स्थानेषु अपि सन्ध्याया: भिन्नं भिन्नं महत्त्वमत्र प्रतिपादितमस्ति ।

## सन्ध्यावन्दनस्य विविधरूपाणि पद्धतय: ।

विविधशास्त्रानुसारं वैदिकानां भिन्ना: भिन्ना: पद्धतय: प्रयोगाश्च सन्ध्यावन्दनस्य भवन्ति । किन्तु जपोपासनासूर्यार्घ्यादिदानादिकं प्राय: सर्वेषु प्रकारेषु प्रयोगेषु भवति । सन्ध्यायां सङ्कल्प:, प्राणायाम:, मार्जनम्, मन्त्राचमनं, सूर्योपस्थानं, अर्घदानम्, गायत्रीजप:, जपनिवेदनम् इत्यादीनि भवन्ति । विस्तरेण सन्ध्याप्रयोगवत् संक्षिप्तप्रयोगा: अपि सन्ध्यावन्दनस्य प्राप्यन्ते ब्रह्मनित्यकर्मसमुच्चये (पृ. १२७) सूत्रोक्तत्रिकालसन्ध्याप्रयोग: कथित: । तत्र भस्मधारणं त्र्यायुषमिति मन्त्रेण, आचमनं, शिखाबन्धनम्, प्राणायाम: मार्जनम् सङ्कल्प:, अर्घ्यदानम्, सूर्योपस्थानम्, गायत्रीमन्त्रजप:, अर्पणम् इति कार्याणि कथितानि अत्र च मन्त्राणां विनियोग: न दर्शित: ।

पारस्करगृह्यसूत्रे अपि प्राणायामस्य अनुष्ठानं कार्यमिति कथितम् यथा– आतमितो: प्राणमायच्छेदित्येके । (आप. २/५//१५) अत्र यावत् प्राणधारणं कर्तुं शक्यते तावत् कुम्भकेन प्राणधारणं कार्यम् इति कथितम् । एवमेव संक्षेपेण पारस्करगृह्यसूत्रे सन्ध्यानिरूपणं प्राप्यते । तदनुसारं च त्रिराम्यासून् । पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वा । ऊर्ध्वबाहु: सूर्यमुदीक्षन्नुद्वमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति बिभ्राडित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् । (पा.गृ.परि. २/३ त: ५ सूत्राणि)

इत्थं संक्षिप्ततया सन्ध्याप्रकार: कथित: ।



Scanned with CamScanner

सन्ध्या सूर्योपासना ।

इत्थं विलोक्यमाने सन्ध्या मुख्यत्वेन सूर्यदेवस्य प्रसन्नतायै क्रियमाणा तदीया उपासना वर्तते । सूर्य एव जगतः तस्थुषश्च आत्मा अस्ति तदुपासना आत्मोपासना इत्यपि वक्तुं शक्यते । बुद्धिप्रेरकस्य सूर्यस्य उपासनया वरेण्यतेजसः उपासना प्रोक्ता । सन्ध्यावन्दनस्य समर्पणसङ्कल्पः अपि श्रीसविता देवता प्रीयतां न मम इति प्रोच्यते ।

सनातनवैदिकपरम्परायां त्रिकाले क्रियमाणं नित्यकर्म सन्ध्यावन्दनं परमोपकारकमस्ति । सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । उभे सन्ध्ये तु कर्तव्ये ब्राह्मणैस्तु गृहेष्वपि । (क.का.प्र.पृ.१६२) इति शम् ।

सन्दर्भग्रन्थाः


(१) कर्मकाण्डप्रदीपः सं. वासुदेवशास्त्री पणशीकरः, प्रका. चौखम्भा संस्कृतसंस्थान, वाराणसी, पुनःमुद्रित–२०११

(२) पारस्करगृह्यसूत्रम् – सं. डॉ. सुधारक मालवीयः, चौखम्भा प्रकाशन, वाराणसी, तृतीय संस्करण–२०१४ ।

(३) आपस्तम्बधर्मसूत्रम् – व्याख्या: डॉ. उमेशचन्द्रपाण्डेयः, चौखम्भा संस्कृत संस्थान, वाराणसी, पुनर्मुद्रितसंस्करण वि. सं. २०७३ ।

(४) बृहद्ब्रह्मनित्यकर्मसमुच्चयः – सं. शास्त्रीदुर्गाशङ्कर उमाशंङ्कर ठाकर, प्रका. शास्त्री अरुण यज्ञदत्त ठाकर, मुम्बई सं. २०५१ ।



प्राचार्यः

श्री सोमनाथसंस्कृत युनिवर्सिटी कोलेज, वेराल, गुजरात


Scanned with CamScanner